# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-1)(New&Old)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.E.1.1.1** | समयः- 11:30 तः 2:30पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – साहित्यदर्पणः | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ सप्रसङ्गं कारिके द्वे सार्थं विविच्येताम्** १०

१ चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

२ वाक्यं रसात्मकं काव्यम् ।

३ कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥

**प्रश्न २ कस्याप्येकस्य सविस्तरं यथाग्रन्थम् उत्तरं लिखत ।** १०

१ ग्रन्थस्य ग्रन्थकारस्य परिचयं लिखत ।

२ काव्यस्य प्रयोजनं प्रतिपाद्य स्वरूपं विविच्यताम् ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयोः सन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या ।** १०

१ अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ।

२ मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥

३ सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च ।

**प्रश्न ४ कस्याप्येकस्य उत्तरं लिखत ।** १०

१ “वाक्यं रसात्मकं काव्यं” तत्र किं नाम वाक्यम् इति ग्रन्थानुसारं लिखत ।

२ लक्षणाशक्तेः लक्षणं विलिख्य विवेचनं कुरुत ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ द्वयोः ससन्दर्भं व्याख्या कार्या ।** १०

१ सादृश्येतरसम्बन्धाः शुद्धास्ता: सकला अपि ।

२ अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ।

३ लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया ॥

**प्रश्न ६ कस्यापेकस्य ग्रन्थानुसारेण उत्तरं लिखत ।** १०

१ का नाम व्यञ्जना ? सा कतिविधा? सोदाहरणं लिखत ।

२ लक्षणास्वरूपं सोदाहरणं विवेच्यताम् ।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानां लघूत्तराणि लिखत ।** १०

१ साहित्यदर्पणस्य रचयिता कः ?

२ आचार्यविश्वनाथः कस्य देशस्य निवासी आसीत् ?

३ आचार्यविश्वनाथस्य पितामहस्य नाम किमासीत् ?

४ आचार्यविश्वनाथस्य कालः कः ?

५ साहित्यदर्पणो ग्रंथः अध्यायेषु विभक्तः अथवा परिच्छेदेषु ?

६ कतिसंख्यका कतिविधा व्यञ्जना भवति ?

७ शृङ्गारस्य स्थायी भावः कः ?

८ शृङ्गारस्य देवता का ?

९ साहित्यदर्पणस्य प्रथमपरिच्छेदस्य किं नाम ?

१० विश्वनाथस्य काव्यलक्षणं किम् ?

११ जातिः कीदृशी ?

१२ मुख्यार्थबाधः केन हेतुना भवति ?

१३ रूढौ उपादानलक्षणायाः किमुदाहरणम् ?

१४ प्रयोजने उपादानलक्षणायाः किमुदाहरणम् ?

१५ प्रयोजने लक्षणलक्षणायाः किमुदाहरणम् ?